# B.A. 1st Semester (Programme) Examination, 2019-20

## SANSKRIT

**Course ID : 10919** **Course Code : ACPSNS-103C-MIL-1**

Course Title: MIL-1

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु परिच्छेदेषु यथेच्छ*मेकं* पठित्वा प्रश्नानाम् उत्तराणि लिख्यन्ताम्। 10×1=10

(a) कस्मिंश्चिद् ग्रामे हरिदत्तनामा दरिद्रः ब्राह्मणः निवसति स्म। तेन भिक्षावृत्त्या जीविका उपार्ज्यते स्म। यदा तया वृत्त्या परिवारस्य भरणपोषणं सम्यक् न समभवत् तेन तदा कृषिकार्यम् अक्रियत। कठिनं श्रमं कुर्वता अपि तेन कृषिकर्मणि साफल्यं न अलभ्यत। दुर्दैवात् तस्य पक्वं सस्यमपि विनष्टम्। एकदा चिन्तितः सः स्वक्षेत्रे कस्यचिद् वृक्षस्य अधः शयानः आसीत्। तदा तेन कश्चन विषधरः सर्पः दृष्टः! आदौ स सर्पाद् भीतः अभवत्। अनन्तरं तेन चिन्तितं यत् – 'अनेन सर्पेण मदीयं कृषिक्षेत्रं रक्ष्यते। इदानीं यावत् मया एतस्य सत्कारो न विहितः। मन्ये एतदर्थं सस्यं विनष्टं भवति। इतः परं मया एतस्य पूजा विधातव्या' इति।

(i) ब्राह्मणस्य नाम किम् आसीत् 1

(ii) कथं स ब्राह्मणः कृषिकर्म आरब्धवान्? 3

(iii) चिन्तितः स कुत्र शयानः आसीत्? 2

(iv) शस्यहानिकारणं किमासीत् ब्राह्मणस्य नये? 2

(v) कस्माद् भीतः अभवत् ब्राह्मणः? 1

(vi) शस्यहानिनिवारणाय कीदृशः उपायः चिन्तितः ब्राह्मणेन? 1

(b) प्राचीने भारते मगधजनपदे नन्दवंशस्य साम्राज्यम् आसीत्। तस्मिन् राज्ये बुद्धिमन्तः मन्त्रिणः कर्तव्यनिष्ठाः कर्मचारिणः च राज्ञः साहाय्यं कुर्वन्ति स्म। मगधसाम्राज्यस्य सभायां गुणवन्तः चिन्तनशीलाः ज्ञानिनश्च पण्डिताः आसन्। ते विद्वांसः समदर्शिनः आसन्। अतः न्यायव्यवस्था अतीव समीचीना आसीत्। तस्मिन् राज्ये शक्तिमन्तः सैनिकाः दीर्घकायाः वीराश्च आसन्। तैः तत्र अश्वशालायां श्वेतेभ्यः कृष्णेभ्यः रक्तेभ्यः विचित्रवर्णेभ्यः च बलिष्ठेभ्यः अश्वेभ्यः युद्धप्रशिक्षणं दीयते स्म। नगरस्य वैभवमपि उत्कृष्टमासीत्। तत्र उन्नतं दीर्घञ्च भवनं, सुन्दरं सुरम्यं मनोहरं च उद्यानं, विशालः तड़ागः, सुदीर्घः राजमार्गः च नगरस्य शोभां वर्धयन्ति स्म।

(i) नन्दवंशस्य साम्राज्यं कुत्र आसीत्? 1

(ii) राज्ञः मन्त्रिणः कीदृशाः आसन्? 2

(iii) नगरस्य शोभा आलोच्यताम्। 3

(iv) सैनिकाः कीदृशाः आसन्? 3

(v) सैनिकाः केभ्यः युद्धप्रशिक्षणं यच्छन्ति स्म? 1

(c) भारतस्य चतुर्षु स्थानेषु कुम्भमेला: आयोज्यन्ते– प्रयागे, हरिद्वारे, उज्जयिन्यां, नासिके च। एतानि चत्वारि नगराणि चतसृणां प्रमुखानां नदीनां तीरेषु अवस्थितानि सन्ति। एषु प्रथम: तीर्थराज: प्रयाग: तिसृणां पवित्रनदीनां सङ्गमस्थले अवस्थित:। तासु तिसृषु नदीषु द्वे नद्यौ गङ्गायमुने च प्रयागे एव परस्परं मिलत:। तृतीया नदी सरस्वती विलुप्ता अस्ति। सा उपरि न दृश्यते। द्वितीयं हरिद्वारं गङ्गानदीतटे राजते। तृतीया नगरी उज्जयिनी सिप्रानद्या: तीरे वर्तते, तथा चतुर्थं नासिकनगरं गोदावरीनदीकूले अस्ति।

(i) कुम्भमेला कुत्र कुत्र आयोज्यते? 3

(ii) तीर्थराज: प्रयाग: कुत्र अवस्थित:? 2

(iii) का नदी अधुना विलुप्ता? 1

(iv) गङ्गायमुने परस्परं कुत्र मिलत:? 1

(v) गोदावरीकूले किं नगरम् अस्ति? 1

(vi) हरिद्वारं कुत्रावस्थितम्? 1

(vii) उज्जयिनी नगरी कुत्रास्ति? 1

**2.** यथेच्छ*मेकस्य* शब्दस्य सर्वाणि रूपाणि लेख्यानि। 5×1=5

(a) नदी - शब्दस्य

(b) हरि - शब्दस्य

**3.** यथेच्छं *द्वयो:* समाधानं कार्यम्। 5×2=10

(a) पठ्–धातो: विधिलिङि लङि च रूपणि लिखतु।

(b) लभ्–धातो: लटि लृटि च रूपाणि लिख्यन्ताम्।

(c) खाद्धातो: लोटि लङि च रूपाणि लिख्यन्ताम्।

**4.** यथेच्छं *पञ्चानां* रेखाङ्कितपदानां सकारणविभक्तिनिर्देश: करणीय:। 2×5=10

(a) रामेण सह सीता वनं गच्छति।

(b) वने गाव: चरन्ति।

(c) चर्मणि व्याघ्रं हन्ति।

(d) श्याम: घनादपि कृष्ण:।

(e) शिशु: हस्ताभ्याम् ओदनं खादति।

(f) सरस्वत्यै नम:।

(g) दरिद्रेभ्य: राजा वस्त्रं यच्छति।

(h) देवदत्त: यज्ञदत्तेन भारं वाहयति।

**5.** यथेच्छं प्रश्नपञ्चकं समाधेयम्। 1×5=5

(a) लभ्-धातोः शनच्प्रत्यये किं रूपम्।

(b) प्रपूर्वकात् नम्धातोः (क्त्वास्थाने) ल्यपि किं रूपम्?

(c) दातुम् इत्यस्य प्रकृतिप्रत्ययौ आलोच्यौ।

(d) पठनम् इत्यस्य व्युत्पत्तिनिर्णेया।

(e) स्तुत्यः इत्यत्र को नाम धातुः कश्च प्रत्ययः?

(f) देयम् इत्यस्य व्युत्पत्तिनिर्णयः कार्यः।

(g) गम्-धातोः क्त्वाप्रत्यये किं रूपम्।

*अथवा*

यथेच्छं *पञ्च* प्रश्नाः समाधेयाः। 1×5=5

(a) ईक्ष्-धातोः शानचि किं रूपम?

(b) कृधातोः अनीयर्-प्रत्यये पुंलिङ्गप्रथमैकवचने किं रूपम्?

(c) पठितुम् इत्यस्य व्युत्पत्तिः निर्णेया।

(d) पठ्धातोः शतृप्रत्यये पुंलिङ्गे प्रथमैकवचने किं रूपम्?

(e) कार्यम् इत्यस्य व्युत्पत्तिः निर्णेया।

(f) वच्-धातोः क्त्वाप्रत्यये किं रूपम?

(g) शीधातोः तुमुन्प्रत्यये किं रूपम्?

(g) पाधातोः यत्प्रत्यये क्लीवलिङ्गे प्रथमैकवचने किं रूपम्?